577

M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 628

Title: Edaka Shanti

628

उदकशांति: Incomplete

Udaka Shānti			: **Title**
:	:		: Author
:	:		: Editor
:	:		: Year, Vols.
:	:		: Publisher
628 :	:	Ends abruptly	: Remarks

उद· शां·

श्रीगणेशायनमः॥ गोमयेनगोचर्ममात्रंचतुरस्रमुपलिप्यकर्ताशुचिःस्नातःप्रक्षालि
तपादोद्वाचांतोदर्भेषुपविष्टःदूर्वादर्भान्धारयमाणःपत्न्यासहप्राणानायम्यदेशका
१ लौसंकीर्त्यअमुककर्मांगभूतामुदकशांतिंकरिष्येइतिसंकल्प्यपंचप्रस्थसि
कताभिःशुध्दाभिररत्निमात्रंचतुरस्रंस्थंडिलंकृत्वास्वर्णवर्णव्रीहिदर्भानंगुष्ठे
नमाहानाम्न्याचोपसंगृह्यब्रह्मजज्ञानमितितस्यमध्येपश्चादारभ्यप्राची
पर्यंतंसंततंलेखांलिखित्वानासिकेसुपर्णमितितद्दक्षिणतःप्रादेशमात्रांतथै
वालिखित्वाआप्यायस्वेत्युत्तरतस्तथैवलिख्ययोरुद्राअग्नाविंतितस्यदक्षि
णतोमध्यादारभ्योदीचीपर्यंतंसंततंलेखांलिखित्वाइदंविष्णुरितिपश्चात्प्रादेशमात्रां
तथैवलिखित्वेंद्रं विश्वाअवीवृधन्नितिपुरस्तात्तथैवालिखित्वाद्भिरभ्युक्ष्यदूर्वा १

दर्भैरवकीर्यगंधोदकेनाभ्युक्ष्यतदुत्तरतोदर्भेषुब्रह्मपात्रंप्रोक्षणीरासाद्यतिरःपवि
त्रंप्रोक्षणीःसंस्कृत्यब्रह्मपात्रंसंप्रोक्ष्याधःपयेत्॥ ब्रह्मजज्ञानमितिकुंभंस्थंडि
लेनिधायदेवस्यत्वेतिपुरस्तात्सोउदशदर्भैरुदगग्रैःपरिस्तीर्यभूर्भुवःस्वरितिसप्त
दशभिर्दक्षिणतःप्रागग्रैरुदयंतमसस्परीतिपश्चात्सप्तदशभिरुदगग्रैरग्नआया
हिवीतयइत्युत्तरतःसप्तदशभिःप्रागग्रैस्तत्सवितुर्वरेण्यमितिजपन्निरःपवित्रं
अपपवित्रंपआनीयापःप्रणयतितिचब्रह्मपात्रेयवाक्षततंडुलानोप्यपुष्पैर्दूर्वा
भिःकुशैश्चावकीर्यसंपूज्यचतुरान्ब्राह्मणान्स्नातान्प्रक्षालितपाणिपादानाचांता
न्पतिदिशमासनेषूपविश्यचान्नोदेवीरितिब्रह्मपात्रमभिमृश्यतेब्राह्मणान्ब्रह्म
पात्रमन्वारभ्यजपंति।तत्सवितुर्वरेण्यमित्येतांपच्छोऽर्धर्चशःकृत्स्नशोवेदादौ

जपति ॥ अग्निमीळेपुरोहितमिषेत्वोऽग्न आयाहि शंन्नोदेवीरिति ऋ॰ गुरुश्रया अइत्य
नुवाकं मदेचिदस्येति अर्धर्चमयाहत्यइंद्रं वो विश्वतस्परीत्येतदनुवाकं यत इंद्र भ
२ यामहे स्वस्तिदा विशस्पतिरिति द्वाभ्यां महं इंद्रः सजोषमिति द्वाभ्यां यद्देवाः पुरः स
द इति पंचपर्यायैरग्नयेरक्षोघ्न इति पंचाग्निरायुंष्याणीति पंचा॰ हासुर्वाया वामिंद्रा
वरुणाति चतस्रो यो वामिंद्रावरुणेत्यष्टावग्नेयशस्विन्निति चतस्रो ऋताषाडित्य
तदनुवाकं नमो अस्तु सर्वेभ्य इति त्रिभिरनुच्छंदसं पंचो उअयंपुरो हरिकेश इति पंच
पर्यायैरप्रतिरथमाशुः शिवानइत्येतदनुवाकं शंच म इत्येतदनुवाकं ममाग्ने ऽग्नेर्म
वमिति द्वाभ्यामनुवाकाभ्यां सर्पाकुनीः समीचीनामासीति षड्भिः ध्रुवा नायु धेयेति पं २
चभूतं भव्यमित्येतदनुवाकमिंद्राद धीः चो अस्मभिरित्येतदनुवाकं चक्षुषा हो

तोभ्रातृव्यं पादयामसीत्येतदनुवाकं प्राणा रक्षसीत्येतदनुवाकं सिंहे व्याघ्र इत्यनुवाकं महस
स्मिनाम्न्या चंद्रमसा इति द्वाभ्यामनुवाकाभ्यामग्निरृ॰ ध्यास्मिन्वानवा इत्य
नुवाकान् अग्नये स्वाहा कृत्तिकाभ्य इत्युपहोममंत्रान्दधिक्राव्णा यज्ञिधियंत
हिरण्यवर्णाः पवमानस्तनुं याम्भुर्भुवः स्वरिति न माब्राह्मणा इति परिधानीयां
त्रिरन्वाहः प्रणवेनोदकुंभमुच्चालयंति व्याहृतिभिः स्वरूपमयालिंगाभिश्च
वारुणीभिश्चापावमानीभिश्चाभिषिंचेत् ॥ तेरैवतं प्रभातस्युः स्नापयेत्कर्मतः
पुरा ॥ सुवर्णरजतं कां[illegible]संवासश्चैव यथाक्रमं विप्रेभ्य उपविष्टेभ्यो दद्यात्स्व
निदिचांशुधः नहरहीनानां ज्वरगृहीतानां भूतोपसृष्टानां मित्रबंधु
म.ह कानि संबंधि बांधवानां राज्ञां राजपुरोहितानां च बालवृद्धानां[illegible]

शो॰

उद॰ शां

र्तनीयापोदीर्घ[redacted]गीद्धृनातुरान्प्रोक्षति एवमेकरात्रत्रिरात्रंपंचरात्रंसप्तरात्रंचैत्य
पसृत्युंनयतीत्याहभगवान्बोधायनः॥ ॥ ॐ कृणुष्वपाजःप्रसितिंनपृ
३ थ्वींयाहिराजेवामवाँ इभेन॥ तृष्वीमनुप्रसितिंद्रूणानोस्तासिविध्यरक्षस
स्तपिष्ठैः॥ तवभ्रमासआशुयापतंत्यनुस्पृशधृषताशोशुचानः। तपूंष्य शो॰
ग्नेजुह्वापतंगानसंदितोविसृजविष्वगुल्काः। प्रतिस्पशोविसृजतूर्णितमो
भवापायुर्विशोअस्याअदब्धः। योनोदूरेअघशंसः सोयोअंत्यग्ने
माकिष्टेव्यथिरादधर्षीत्। उदग्नेतिष्ठप्रत्यातनुष्वन्यमित्राँ ओषतात्ति
ग्महेते। योनोअरातिंसमिधानचक्रेनीचातंधक्ष्यतसंनशुष्कं। ऊ ३
र्ध्वोभवप्रतिविध्याध्यस्मदाविष्कृणुष्वदैव्यान्यग्ने। अवस्थिरातनुहि

यातुजूनांजामिमजामिंप्रमृणीहिशत्रून्॥ सतेजानातिसुमतिंयविष्ठयईवतेब्रह्मणे ति॰
गातुमैरत्। विश्वान्यस्मैसुदिनानिरायोद्युम्नान्यर्योविदुरोअभिद्यौत्। सेदग्ने
अस्तुसुभगःसुदानुर्यस्त्वानित्येनहविषायउक्थैः। पिप्रीषतिस्वआयुषिदुरोणे
विश्वेदस्मैसुदिनासासदिष्टिः। अर्चामितेसुमतिंघोष्यर्वाक्संतेवावाताजरतामि
यंगीः। स्वश्वास्त्वासुरथामर्जयेमास्मेक्षत्राणिधारयेरनुद्यून्। इहत्वाभूर्याचरेदु
पत्मंदोषावस्तर्दीदिवांसमनुद्यून्। क्रीडंतस्त्वासुमनसःसपेमाभिद्युम्नातस्थिवांः
सोजनानां। यस्त्वास्वश्वःसुहिरण्योअग्नउपयातिवसुमतारथेन। तस्यत्राताभ
वसितस्यसखायस्तआतिथ्यमानुषग्जुजोषत्। महोरुजामिबंधुतावचोभिस्तन्मा
पितुर्गो[redacted]तमादन्वियाय। त्वंनोअस्यवचसश्चिकिद्धिहोतर्यविष्ठसुक्रतोद

मूना॰॥ अस्वप्नजस्तरणयः॰ सुशेवा अतंद्रासोवृका अश्रमिष्ठाः॰॥ तेपायवः सध्र्यंचो
निषद्याग्नेतवनः॰ पांत्वमूर। येपायवोमामतेयंते अग्नेपश्यंतो अंधंदुरितादरक्षन्॥
ररक्षतांस्सुकृतोविश्ववेदादिप्संत इद्रिपवोनाहदेभुः॰। त्वयावयं सधन्यस्त्वोतास्त
वप्रणीत्यश्यामवाजान्। उभाशंसासूदयसत्यतातेनुष्ठुयाकृणुह्यह्रयाण।
अयाते अग्नेसमिधाविधेमप्रतिस्तोमंशस्यमानंगृभाय। दहाशसोरक्षसः पाह्या
स्मान्द्रुहोनिदोमित्रमहोअवद्यात॥ रक्षोहणंवाजिनमाजिघर्मिमित्रंप्रथिष्ठमुपयामि[illegible]
शिशर्म। शिशानोअग्निः क्रतुभिः समिद्धः सनोदिवासरिषःपातुनक्तं। विज्योतिषा
बृहताभात्यग्निराविर्विश्वानिकृणुतेमहित्वा। प्रादेवीर्मायाःसहतेदुरेवाःशिशीते
शृंगेरक्षसेविनिक्षे। उतस्वानासोदिविषंत्वग्नेस्तिग्मायुधारक्षसेहंतवाउ। इंद्रंवो ॥४॥

विश्वतस्परिहवामहेजनेभ्यः। अस्माकमस्तुकेवलः। इंद्रंनरोनेमधिताहवंतेयत्पार्यायु
नजतेधियस्ताः। शूरोनृषाताशवसश्चकानआगोमतिव्रजेभजात्वंनः। इंद्रियाणि
शतक्रतोयातेजनेषुपंचसु। इंद्रतानितआवृणे। अनुतेदायिमहइंद्रियायसत्राते
विश्वमनुवृत्र[illegible]हत्ये। अनुक्षत्रमनुसहोयजत्रेंद्रदेवेभिरनुतेनृषह्ये। आयस्मिन्सप्तवा ऊ ४
हे॰ सवास्तिष्ठंतिस्वारुहोयथा। ऋषिर्हदीर्घश्रुत्तमइंद्रस्यघर्मोअतिथिः। आमासुपक्व
मैरयआसूर्यंरोहयोदिवि। घर्मंनसामंतपतासुवृक्तिभिर्जुष्टंगिर्वणसेगिरः। इंद्रमिद्गा
थिनोबृहदिंद्रमर्केभिरर्किणः। इंद्रंवाणीरनूषत। गायंतित्वागायत्रिणोर्चंत्यर्कमर्कि
णः। ब्रह्माणस्त्वाशतक्रतउद्वंशमिवयेमिरे। अंहोमुचेप्रभरेमामनीषामोषिष्ठदाव्ने
सुमतिंगृणानाः। इदमिंद्रप्रतिहव्यंगृभायसत्याःसंतुयजमानस्यकामाः। वि

उ॰ शर्म॰ वेधस्यन्माधिषणा जजानस्तवे पुरापार्यादिंद्रमह्नः। अंहसोयत्रपीपरद्यथानोनावेव
यांतमुभयेहवंते। प्रसम्राजंप्रथममध्वराणामंहोमुचंवृषभंयज्ञियानां। अपां
५ नपातमश्विनाहयंतमस्मिन्नरइंद्रियंधत्तमोजः। विनइंद्रमृधोजहिनीचायच्छपृ
तन्यतः। अधस्पदंतमींकृधियोअस्माँअभिदासति। इंद्रक्षत्रमभिवाममोजोजाय
थावृषभचर्षणीनां। अपानुदोजनममित्रयंतमुरुंदेवेभ्योअकृणोरुलोकं। मृगोनभी
मःकुचरोगिरिष्ठाःपरावतआजगामापरस्याः। सृकंसंशायपविमिंद्रतिग्मंवि
शत्रून्ताढिविमृधोनुदस्व। विशत्रून्विमृधोनुदविवृत्रस्यहनूरुज। विमन्युमिंद्र
भामितोमित्रस्याभिदासतः। त्रातारमिंद्रमवितारमिंद्रंहवेहवेसुहवंशूरमिं ५
द्रं। हुवेनुशक्रंपुरुहूतमिंद्रंस्वस्तिमघवाधात्विंद्रः। मातेअस्यांसहसावन्प
रिष्टावघायभूमहरिवःपरादै। त्रायस्वनोवृकेभिर्वरूथैस्तवप्रियासःसूरिषु

स्याम। अनवस्तेरथमश्वायतक्षंत्वष्टावज्रंपुरुहूतद्युमंतं। ब्रह्माणइंद्रंमहयंतोअर्कैरवर्धयन्न
हयेहंतवाउ। वृष्णेयत्तेवृषणोअर्कमर्चानिंद्रग्रावाणोअदितिःसजोषाः। अनश्वासोये
पवयोरथाइंद्रेषिताअभ्यवर्ततदस्यून्। यतइंद्रभयामहेततोनोअभयंकृधि। मघव
ञ्छग्धितवतंनऊतयेविद्विषोविमृधोजहि। स्वस्तिदाविशस्पतिर्वृत्रहाविमृधोवशी।
वृषेंद्रःपुरएतुनःस्वस्तिदाअभयंकरः। महाँइंद्रोवज्रबाहुःषोडशीशर्मयच्छतु। स्वस्ति
नोमघवाकरोतुहंतुपाप्मानंयोस्मान्द्वेष्टि। सजोषाइंद्रसगणोमरुद्भिःसोमंपिबवृत्रहंशू
रविद्वान्। जहिशत्रूँरपमृधोनुदस्वाथाभयंकृणुहिविश्वतोनः। येदेवाःपुरःसदोग्नि
नेत्रारक्षोहणस्तेनःपांतुतेनोवंतुतेभ्योनमस्तेभ्यःस्वाहा। समूढंरक्षःसंदग्धंरक्षइद
महंरक्षोभिसंदहामि। येदेवादक्षिणसदोयमनेत्रारक्षोहणस्तेनः। येदेवाःपश्चात्सदः

उ·द·शां सवितृनेत्रा रक्षोहणस्ते॰। ये देवा उत्तरसदो वरुणनेत्रा रक्षोहणस्ते॰ ये देवा उपरिषदो बृहस्पतिने
त्रा रक्षोहणस्ते॰।५।। अग्नये रक्षोघ्ने स्वाहा। यमाय रक्षोघ्ने स्वाहा। सवित्रे रक्षोघ्ने स्वाहा
६ वरुणाय रक्षोघ्ने स्वाहा। बृहस्पतये दुवस्वते रक्षोघ्ने स्वाहा। अग्निरायुष्मान्स वनस्पतिभि
रायुष्मांस्तेन त्वायुषायुष्मन्तं करोमि। सोम आयुष्मान्स ओषधीभिरायुष्मांस्ते॰। यज्ञ आयुष्मा
न्स दक्षिणाभिरायुष्मांस्ते॰। ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्मत्ते॰ देवा आयुष्मन्तस्तेऽमृतेनायुष्मन्तस्ते॰।
आयुष्टे विश्वतो दधदयमग्निर्वरेण्यः। पुनस्ते प्राण आयाति परा यक्ष्मं सुवामि ते। आयुर्दा
अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि। घृतं पीत्वा मधु चारु गव्यं पितेव पुत्र
मभिरक्षतादिमं। यो वामिंद्रावरुणावग्न्यास्तनूस्तयेमममंहसो मुंचतं। यो वामिंद्रावरुणा ६
सहस्यास्तनूस्तये॰। यो वामिंद्रावरुणा रक्षस्यास्तनूस्तये॰। यो वामिंद्रावरुणा तेजस्या

स्तनूस्ते॰। यो वामिंद्रावरुणाविंद्राय स्थाम स्तन्वामेतेन वयजे। यो वामिंद्रावरुणा द्विपात्सु पशुषु स्वा
म॰ यो वामिंद्रावरुणा गोष्ठे स्वाम॰। यो वामिंद्रावरुणा गृहेषु स्वाम॰। यो वामिंद्रावरुणाप्सु स्वा
म॰। यो वामिंद्रावरुणा ओषधीषु स्वाम॰। यो वामिंद्रावरुणा वनस्पतिषु स्वाम॰। अग्ने यश
स्विन्यशसेममर्पयेंद्रावतीमपचितीमिहावह। अयं मूर्धा परमेष्ठी सुवर्चाः समानाना
मुत्तमः श्लोको अस्तु। भद्रं पश्यंत उपसेदुरग्रे तपो दीक्षामृषयः सुवर्विदः। ततः क्षत्रं ब
लमोजश्च जातं तदस्मै देवा अभिसन्नमंतु। धाता विधाता परमोत संदृक्प्रजापतिः प
रमेष्ठी विराजा। स्तोमाश्छंदांसि निविदो म आहुरेतस्मै राष्ट्रमभिसंनमाम। अ
भ्यावर्तध्वमुप मेत साकमयं शास्ताधिपतिर्वो अस्तु। अस्य विज्ञानमनु संरभध्वमिमं
पश्चादनु जीवाथ सर्वे। ऋताषाडृतधामाग्निर्गंधर्वस्तस्यौषधयोऽप्सरस ऊर्जो नाम स इदं ब्रह्म

उ॰ शां॰ क्षत्रंपातुताइदंब्रह्मक्षत्रंपांतुतस्मैस्वाहाताभ्यःस्वाहासः हितोविश्वसामासूर्योगंधर्वस्तस्य
मरीचयोप्सरसआयुवःस्सुषुम्णःसूर्यरश्मिश्चंद्रमागंधर्वस्तस्यनक्षत्राण्यप्सरसोवे
८ कुरयोभुज्युःसुपर्णोयज्ञोगंधर्वस्तस्यदक्षिणाअप्सरसःस्तवाःप्रजापतिर्विश्वकर्मामं
प्र॰ नोगंधर्वस्तस्यापौरसो।ॐ सुराभ्कवनस्यपतेयस्यतउपरिगृहाइहच्या।सनोरास्वाज्यानिं
रायस्पोषंसुवीर्यंसंवत्सरीणांस्वस्तिं।परमेष्ठ्यधिपतिर्मृत्युर्गंधर्वस्तस्यविश्वमप्स
रसोभुवःस्सुक्षितिःसुभूतिर्भद्रकृत्सुवर्वान्पर्जन्योगंधर्वस्तस्यविद्युतोप्सरसोरुचो
दूरेहेतिरमृडयोमृत्युर्गंधर्वस्तस्यप्रजाअप्सरसोभीरुवश्चारुःकृपणाआनंदीकामोगं
धर्वस्तस्याधयोप्सरसःशोसहमानउग्नः।अभीवीरोअभिसत्वासहोजाजैत्रमिंद्ररथ
मातिष्ठगोवित्।अभिगोत्राणिसहसागाहमानोदायोवीरःशतमन्युरिंद्रः।दुश्च्यव

नःपृतनाषाडयुध्योस्माकंसेनाअवतुप्रयत्सु।इंद्रआसांनेताबृहस्पतिर्दक्षिणायज्ञः
पुरएतुसोमः।देवसेनानामभिभंजतीनांजयंतीनांमरुतोयंत्वग्रे॥इंद्रस्यवृष्णोवरुण
स्यराज्ञआदित्यानांमरुतांशर्धउग्नं।महामनसांभुवनच्यवानांघोषोदेवानांजयता
मुदस्थात्।अस्माकमिंद्रःसमृतेषुध्वजेष्वस्माकंयाइषवस्ताजयंतु।अस्माकंवीराउ
त्तरेभवंत्वस्मानुदेवाअवताहवेषु।उद्धर्षयमघवन्नायुधान्युत्सत्वनांमामकानांमहांसि।
उद्वृत्रहन्वाजिनांवाजिनान्युद्रथानांजयतामेतुघोषः।उपप्रेतजयतानरस्थिरावःसं
तुबाहवः।इंद्रोवःशर्मयच्छत्वनाधृष्यायथासथ।अवसृष्टापरापतशरव्येब्रह्मसं
शिता।गच्छामित्रान्प्रविशमैषांकंचनोच्छिषः॥वर्माणितेवर्ममि[illegible]श्छादयामिसो

उ॰ शां॰ मस्त्वाराजाग्नेनाभिरक्षतां।उरोर्वरीयोवरुणस्तेजसाहं रुणायंनुदेथे।याराजानं सरथंयाथ

उग्नातानोमुंचतमागसः।योवां रथऋजुरश्मिः सत्यधर्मामिथुश्चरंतमुपयातिदूषयन् ।स्तौ

८ मिमित्रावरुणानाथितोजोहवीमितौनोमुंचतमागसः।वायोःसवितुर्विदथानिमन्महेयावात्मन्व नि ३

द्विभृतोयोवरक्षतः।योविश्वस्यपरिभूबभूवतुस्तौनोमुंचतं॥ वायोःसवितुर्विदथे।उपश्रे

ष्ठानआशिषोदेवयोर्धर्मे आस्थिरन्।स्तौमिवायुं सवितारंनाथितो जोहवीमितौनोमुं॰।

रथीतमोरथीनामह्नऊतयेशुभंगमिष्टौ स्वयमेभिरश्वैः।ययोर्वांदेवौदेवेष्वनिशितमोजस्तौ

नोमुं॰।यस्यानंवहतुं सूर्यायाश्विनवऋणासः सरमिच्छमानौ।स्तौमिदेवावश्विनौनाथि ८

तोजोहवीमितौनोमुं॰।मरुतांमन्वेअधिनोब्रुवंतुप्रेमांवाचंविश्वामवंतुविश्वे।आशूनुव

स्वयमानूतयेतेनोमुं॰चंत्वेनसः।तिग्ममायुधंवीडितंसहस्वद्दिव्यं शर्धःपृतनासुजि

ष्णु॥स्तौमिदेवान्मरुतोनाथितो जोहवीमितेनो॰।देवानांमन्वेअधिनोब्रुवंतुप्रेमांवाचंविश्वामवंतुवि

श्वे।आशून्हुवेसुयमानूतयेतेनो॰।यदिदंमाभिशोचतिपौरुषेयेणदैव्येन।स्तौमिविश्वान्देवान्

नाथितोजोहवीमितेनो॰।अनुनोद्यानुमतिर्यज्ञंदेवेषुमन्यतां।अग्निश्चहव्यवाहनोभवतांदाशुषे

मयः।अन्विदनुमतेत्वंमन्यासैशंचनःकृधि।कृत्वेदक्षायनोहिनुप्रणआयूंषितारिषः।वैश्वानरोन

ऊत्याप्रयातुपरावतः।अग्निरुक्थेनवाहसा।पृष्टोदिविपृष्टोअग्निःपृथिव्यांपृष्टोविश्वाओष

धीराविवेश।वैश्वानरःसहसापृष्टोअग्निःसनोदिवासरिषःपातुनक्तं।येअप्सथेताममितेभिरोजो

भिर्येप्रतिष्ठेअभवतांवसूनां।स्तौमिद्यावापृथिवीनाथितोजोहवीमितेनोमुंचतमंहसः।उर्व

रीरसीवरिवःकृणोतंक्षेत्रस्यपत्नीअधिनोब्रुयातं।स्तौमिद्यावापृथिवीना॰।यत्तेवयं

पुरुषत्राययविष्ठाविद्वांसश्चकृमाकच्चनागः।कृधीस्वस्मांअदितेरनागाथ्येनांसि

उ॰ इ॰ ग्रां॰ शिश्नयोर्विघ्नगामि ।४ थाह्नन्ह्मवो गोर्यं चित्पदिष्विनामसंकं चिनायअन्ना ः। एवा न्वमस्मस्म
१ मुंचात्वयः ऋ: प्राता यगेन प्रतरां न आयुः ॥ मर्माचीनामासि प्राचीदिक् तस्यास्तेअग्निरधिपति
रसितोरक्षितायश्चाधिपतिर्यश्च गोप्ता ताभ्यां नमस्तौ नो मृ॰ उयतां तेयं द्विष्मो यश्च नो द्वेष्टि
तं वां जंभे दधामि। ॐ जस्विनीनामासि दक्षिणादिक् तस्यास्त इंद्रोधिपतिः पृदाकू रक्षिता
यश्चाधिपतिर्यश्च गोप्ता ताभ्यां॰। प्राचीनामासि प्रतीचीदिक् तस्यास्ते सोमोधिपतिः स्वजो
रक्षिता यश्चाधिपतिर्यश्च गोप्ता ताभ्यां॰॥ अवस्थावा नामास्युदीचीदिक् तस्यास्ते वरुणोधि शी॰
पतिस्तिरश्चराजी रक्षिता यश्चाधिपतिर्यश्च गोप्ता ताभ्यां॰। अधिपत्नीनामासि बृहतीदिक्